श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
सत्रान्तपरीक्षा – २०२१

| | | |
|---|---|---|
| कक्षा – आचार्यः | प्रश्नपत्रम् – ३ | गुणाः – ५० |
| विषयः – नव्यव्याकरणम् | सत्रम् – ४ | समयः – १०:०० तः १२:०० |
| दिनाङ्कः – १५/०७/२०२१ | सन्दर्भग्रन्थः – वैयाकरणभूषणसारः | |

**सूचना -** निम्नलिखितेषु एकादशसु प्रश्नेषु केषाञ्चित् पञ्च प्रश्नाः विधेयाः।
प्रत्येकं प्रश्नस्य समानगुणाः। (१०)

**प्रश्नः १** कयोः अपि द्वयोः कारिकयोः व्याख्या कार्या **१०**

१ यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते॥

२ गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते॥

३ आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते।
अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मकः॥

४ सम्बोधनपदं यच्च तत्क्रियाया विशेषणम्।
व्रजानि देवदत्तेति निघातोऽत्र तथा सति॥

**प्रश्नः २** फलव्यापारयोस्तत्र फले तङ्युक्चिणादयः। **१०**
व्यापारे शप्श्नमाद्यास्तु द्योतयन्त्याश्रयान्वयम्॥ इति कारिका भूषणसाररीत्या व्याख्येया।

**प्रश्नः ३** व्यापारो भावना सैवोत्पादना सैव च क्रिया। **१०**
कृञोऽकर्मकतापत्तेर्न हि यत्नोऽर्थ इष्यते॥ इति कारिका भूषणसाररीत्या व्याख्येया।

**प्रश्नः ४** धात्वर्थत्वं क्रियात्वं चेत् धातुत्वं च क्रियार्थता। **१०**
अन्योऽन्यसंश्रयः स्पष्टस्तस्मादस्तु यथाकरम्॥ इति कारिका भूषणसाररीत्या व्याख्येया।

**प्रश्नः ५** सर्वनामाव्ययादीनां यावादीनां प्रसङ्गतः। **१०**
न हि तत्पाठमात्रेण युक्तमित्याकरे स्फुटम्॥ इति कारिका भूषणसाररीत्या व्याख्येया।

**प्रश्नः ६** कयोः अपि द्वयोः उत्तरे लेख्ये। **१०**

१ परतो भिद्यते सर्वमात्मा तु न विकम्पते।
पर्वतादिस्थितिस्तस्मात् पररूपेण भिद्यते॥ इति हरिकारिकां विवृणुत।

२ अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि।
तत्रैव लिङ्विधातव्यः किं भेदस्य विवक्षया॥ इति हरिकारिकां विवृणुत।

३ 'जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा' इत्येतस्याः पङ्क्तेः विवरणं कुरुत।

४ 'समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्' इत्येतं वैयाकरणसिद्धान्तं मण्डयत।

**प्रश्नः ७ वर्तमाने परोक्षे श्वो भाविन्यर्थे भविष्यति।**
**विध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेया लडादयः॥ इति कारिका भूषणसाररीत्या व्याख्येया।**

**प्रश्नः ८ ह्यो भूते प्रेरणादौ च भूतमात्रे लडादयः।**
**सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृतः॥इति कारिका भूषणसाररीत्या व्याख्येया।**

**प्रश्नः ९ सुपां सुपा तिङां नाम्ना धातुनाथ तिङां तिङा।**
**सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः॥ इति कारिका भूषणसाररीत्या व्याख्येया।**

**प्रश्नः१० योऽयं पूर्वपदार्थादिप्राधान्यविषयः स च।**
**भौतपूर्व्यात् सोऽपि रेखागवयादिवदास्थितः॥ इति कारिका भूषणसाररीत्या व्याख्येया।**

**प्रश्नः११ केषामपि दशानां प्रश्नानाम् उत्तराणि लेख्यानि**

१ 'निषादस्थपति'-शब्दस्य कतिभिः प्रकारैः विग्रहः ग्रन्थे प्रदर्शितः?

२ राजपुरुषः इति समासः षट्सु समासेषु कीदृशस्य समासस्य उदाहरणम्?

३ सुपां तिङा सह समासस्य किम् उदाहरणम्?

४ कुम्भकारः इति समासः षट्सु समासेषु कीदृशस्य समासस्य उदाहरणम्?

५ प्राचीनवैयाकरणानुसारं समासः कतिविधः?

६ जहत्स्वार्था वृत्तिः कतिविधा?

७ 'प्रारब्धापरिसमाप्तत्वं भूतभविष्यद्भिन्नत्वं वा' कस्य लक्षणम्?

८ वर्तमानत्वादि लडादिभिर्द्योत्यं वाच्यं वा?

९ कीदृशे भूते परोक्षे लिट् भवति?

१० 'पश्य मृगो धावति' इत्यत्र 'धावति' क्रिया साध्या वा साधनं वा?

११ 'अस्' धातौ वैयाकरणैः व्यापारस्य सत्त्वं स्वीक्रियते न वा?

१२ निर्वर्त्यं, विकार्यं, प्राप्यं चेति त्रयः प्रकाराः कस्य सन्ति?

१३ कीदृशे कर्मणि कर्मवद्भावः न सम्भवति?

१४ स्वार्थव्यापारव्यधिकरणफलवाचकत्वं कस्य लक्षणम्?

१५ कौण्डभट्टस्य पिता कः?

***